जकारस्थान्तःस्थयकारस्थान्त्यसो ऽस्त्य इत्युक्ता वर्णादिरयं निर्णीतः। च, जक्षति। शु च, जक्षिति। इति दुर्गादासः॥

जक्षणं, क्ली, (जक्ष+भावे ल्युट्।) भक्षणम्। इति हेमचन्द्रः। ३। ८७॥

जक्ष्मः, पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+बाहुलकात् मन्।) जक्ष्मा। इत्यमरटीका॥ (केचित् तु "अर्त्तिस्तुसुहुसृधृक्षि-क्षुभायावापदियक्षिनीभ्यो मन्।" इति। "अर्त्तिस्तुसुहुसिति।" १। १३६। उणादिसूत्रेण यक्ष पूजायामिति धातोर्मन्प्रत्ययनिर्द्देशात् अन्तःस्थयकारादिरिति मन्यन्ते॥)

जक्ष्मा, [न्] पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+"सर्व्वधातुभ्यो मनिन्।" उणां। ४। १४४। इति मनिन्।) यक्ष्मरोगः। इत्यमरटीकायां भरतः॥

जगच्चक्षुः, [स्] पुं, (जगतां भुवनानां चक्षुरिव प्रकाशकत्वात्।) सूर्य्यः। इति हेमचन्द्रः। २। १२॥ (यथा, काशीखण्डे। ४६। ४४।
"इति काशीप्रभावज्ञो जगच्चक्षुस्तमोनुदः।
ज्ञात्वा द्वादशधात्मानं काशीपुर्य्यां व्यवस्थितः॥")

जगत्, क्ली, (गच्छतीति। गम+"द्युतिगमिजुहोतीनां द्वे च।" ३। २। १७८। इत्यस्य वार्त्तिं इति क्विपि द्वित्वे च "गमः क्वौ।" ६। ४। ४०। इति मलोपे तुक्।) विश्वम्। तत्पर्य्यायः। जगती२ लोकः३ पिष्टपम्४ भुवनम्५। इत्यमरः। २। १। ६॥ विष्टपम्६। इति तट्टीका॥ (यथा, मनुः। १। ५२।
"यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति॥"
गच्छति इतस्ततो यातीति।) वायौ, पुं। (गच्छन्त्यस्मिन् जीवा इति। महादेवः। यथा, महाभारते। १३। १७। १५१।
"विहुत्तो सुत्ततेजाश्च श्रीमान् श्रीवर्द्धनो जगत्।")
जङ्गमे त्रि। इति मेदिनी। ते, १०८॥

जगत्कर्त्ता, [ऋ] पुं, (करोतीति। कृ+तृच्। ततो जगतः कर्त्ता कारकः।) ब्रह्मा। इति हेमचन्द्रः। २। १२६॥

जगत्प्राणः, पुं, (जगतां विश्वस्थजीवानां प्राणो जीवनम्।) वायुः। इत्यमरः। १। १। ३५॥

जगत्साक्षी, [न्] पुं, (जगतां भुवनानां साक्षी कर्म्मद्रष्टा।) सूर्य्यः। इति हेमचन्द्रः। २। १२॥

जगती, स्त्री, (गच्छति कार्य्यत्वात् नष्टा भवतीति। गम+"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणां २। ८४। इति अतिप्रत्ययेन निपातनात् साधुः। ततः प्रकृतत्वात् "उगितश्च।" ४। १। ६। इति ङीप्।) भुवनम्। (यथा, रामायणे। २। ६९। ११।
"स्वप्नेऽपि सागरं शुष्कं चन्द्रञ्च पतितं भुवि।
उपरुद्धाञ्च जगतीं तमसेव समावृताम्॥")
पृथ्वी। (यथा, मार्कण्डेये। ६। २४।
"तमायान्तं ततो देवी सर्व्वदेवजनेश्वरम्।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि॥")
जनः। छन्दोविशेषः। इति मेदिनी। ते, १०९॥ (सा च द्वादशाक्षरा वृत्तिः। यथा, छन्दोमञ्जर्य्यां १ स्तवके।
"त्रिष्टुप् च जगती चैव तथातिजगती मता॥"
अस्या उदाहरणादीनि छन्दःशब्दे द्रष्टव्यानि॥) जम्बूवप्रम्। इति हेमचन्द्रः॥

जगदम्बा, स्त्री, (जगतामम्बा माता।) दुर्गा। यथाह कश्चित्।
"अदूरे जगदम्बाया शारदीयो महोत्सवः॥"
"जगदम्बापदद्वन्द्वमापदां क्षयसाधनम्॥"
इति शूलपाणिः॥
अपि च ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्याये।
"विष्णुमायां भगवतीं दुर्गां दुर्गतिनाशिनीम्।
प्रकृतिं जगदम्बाञ्च पतिपुत्त्रवतीश्च च॥"

जगदम्बिका, स्त्री, (जगतां अम्बा जननी। ततः स्वार्थे कन्। टापि अत इत्वम्।) दुर्गा। यथा,
"सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका।
अहं सर्व्वान्तरस्था च संसारार्णवतारिणी॥"
इति भगवतीगीतायां ५ अध्यायः॥
(यथा च देवीभागवते। १। ७। ४६।
"कामं कुरुष्व वधमद्य ममैव मात-
र्दुःखं न मे मरणजं जगदम्बिकेऽत्र॥")

जगदाधारः, पुं, (जगतामाधारः आश्रयः।) वायुः। इति शब्दचन्द्रिका॥ जगदाश्रयः। यथा,
"कालो हि जगदाधारः।" इति स्मृतिः।

जगदीशः, पुं, (जगतामीशो नियन्ता।) विष्णुः। इति शब्दरत्नावली॥ (यथा, पाद्मे उत्तरखण्डे। १११ अध्याये।
"सर्व्वान्तर्यामी जगदीशश्चागूरमर्द्दनः प्रभुः॥"
विधाता। यथा, कुमारे। २। ९।
"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥"
स्वनामख्यातपण्डितविशेषः। स च न्यायशास्त्रटीकाद्यास्यार्थवादिग्रन्थप्रणेता अस्य जन्मस्थानं नवद्वीपः॥)

जगद्गौरी, स्त्री, (जगत्सु मध्ये गौरी।) मनसादेवी। इति शब्दरत्नावली॥

जगद्धात्री, स्त्री, (जगतां धात्री विधात्री।) दुर्गाविशेषः। अस्याः पूजायाः कालो विधिश्च यथा, निगमकल्पसारशानसारस्वते ग्रन्थे दुर्गाकल्पे।
श्रीशिव उवाच।
"प्रसीद जगतां मातर्ज्जगन्निस्तारकारिणि!।
अतएव महेशानि! तवाहं शरणागतः॥
त्वया यत् कथितं पूर्व्वं तत् सर्व्वञ्च श्रुतं मया।
जगद्धात्री महादुर्गा चतुर्व्वर्गफलप्रदा॥
तस्याः पूजाविधिर्दिनं कार्त्तं तन्न प्रकाशितम्।
तदेव कथयेशानि! श्रोतुमिच्छामि साम्प्रतम्॥
श्रीदेव्युवाच।
कथयामि महेशान! सावधानोऽवधारय।
तस्याः पूजाविधिर्दिनं समयं भावभेदतः॥
कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः।
सा प्रशस्ता महादेव। महादुर्गाप्रपूजने॥
प्रातश्च सात्त्विकी पूजा मध्याह्ने राजसी मता।
सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता॥
जपयज्ञादिभिर्द्देव! इति त्रैकालिकी मता।
अथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर!॥
सप्तम्यादिनवम्यान्तं पूजाकालमितीरितम्।
त्रिदिने त्रिविधा पूजा दशम्याञ्च विसर्ज्जयेत्॥
पूजापरेऽह्नि देवेश! तत्राप्यत्र विसर्ज्जनम्।
बोधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता॥
श्रीशिव उवाच।
त्रिसन्ध्याव्यापिनी सा तु यदि स्यान्नवमी तिथिः।
त्रिकाले त्रिविधा पूजा कथं देया जगन्मयि!॥
कथयस्व महेशानि! इति मे संशयो हृदि॥
श्रीदेव्युवाच।
सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः।
त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम्॥
मुहूर्त्तव्यापिनी चापि तत्र ग्राह्या महेश्वर!।
एककाले त्रिधा पूजा साधको नैव कारयेत्॥
इति ते कथितं वत्स! किमन्यत् श्रोतुमिच्छसि।
कथयिष्यामि तत्सर्व्वं तव प्रीत्या त्रिलोचन!॥"
श्रीपार्व्वत्युवाच।
"दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर!।
कथं त्रिकालं पूजा वा सम्भवेत् परमेश्वर!॥
श्रीशिव उवाच।
नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत्।
निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि!॥
नवमीदिनमाश्रित्य पूजाविधिरिहोदितः।
दशम्यां बलिदानन्तु निषिद्धं नात्र पार्व्वति!॥
आगमान्तसारे पूर्व्वं पूजाप्रकारं उक्ताः।
"मुहूर्त्तव्यापिनी चापि प्रातश्चेन्नवमी तिथिः।
तद्दिने पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि!॥
त्रिकालं पूजयेत्तत्र नैककाले कदाचन॥"
अथ कात्यायनीतन्त्रे अष्टसप्ततिपटले।
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च।
उपस्थहोंदितो भानुर्दुर्गामाराध्य यत्नवान्॥
पुत्त्रारोग्यबलं लेभे लोकसाक्षित्वमेव च।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम्॥"
शक्तिसङ्गमतन्त्रे।
"कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम्।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः।
पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत्॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः।
पुत्त्रपौत्त्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी॥"
तन्त्रान्तरे।
"कुजवारे युगाद्यायां नवम्यान्तु जगत्प्रभुः।
प्रादुर्भूता महेशानी तत्र तां परिपूजयेत्॥"
तन्त्रान्तरे।
"त्रिकालं पूजयेद्दुर्गां मूलेनैकाक्षरेण च।
नानारत्नविधानेन गीतवाद्यपुरःसरम्॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः।
कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्॥"